कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 2028 विषय भक्ती

नाव. भक्तिरत्नावली MSS

लेखक/लिपीकार परमहंस विष्णुपुरी.

पृष्ठ 56 काळ ______ पूर्ण/अपूर्ण

॥ अथ श्रीभक्तिरत्नावलीप्रारंभः ॥

श्रीगणेशायनमः॥ येमुक्तावपिनिःस्पृहाः प्रतिपदंप्रोन्मीलदा
नंददांयामास्थायसमस्तमस्तकमणिंकुर्वंतियंस्वेवशे॥ तान्भ
क्तानपितांचभक्तिमपितंभक्तप्रियंश्रीहरिंवंदेसंततमर्थ
येनुदिवसंविष्णुंशरण्यंभजे॥१॥ जयतिजननिवासोदेवकी
जन्मवादोयदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं॥ स्थिरचरवृ
जिनघ्नः सुस्मितश्रीमुखेनव्रजपुरवनितानांवर्धयन्कामदेवं
२॥ यत्कीर्त्तनंयत्स्मरणंयदीक्षणंयद्वंदनंयच्छ्रवणंयदर्हणं॥ लो

कस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः॥३॥
भूयोनमः सद्वृजिनच्छिदेसतामसंभवायाखिलसत्वमूर्त्तये
पुंसांपुनः पारमहंस्यआश्रमेव्यवस्थितानामनुमृग्यदाशुषे
४॥ श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्ध
रापतिः॥ पतिर्गतिश्चांधकवृष्णिसात्वतांप्रसीदतांमेभगवा
न्सतांगतिः॥५॥ यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्म
दीपमतितितीर्षतांतमोंधं॥ संसारिणांकरुणयाहपुराणगुह्यं

भ॰

तंव्यासस्ूनुमुपयामिगुरुंमुनीनां ॥ ६ ॥ दूरान्निशम्यमहिमानमु
पेत्यपार्श्वमंतः प्रविश्यप्शुभभागवतामृताब्धौ ॥ पश्यामिह
द्गुकरूणांजननिर्मलेनहृल्लोचनेनभगवद्भजनंहिरत्नं ॥ ७ ॥ त
द्दिमतिमहार्घंभक्तिरत्नंमुरारेरहमधिकसयत्नःप्रीतये
वैष्णवानां ॥ हृदिगतजगदीशादेशमासाद्यमाद्यन्निधिवरमि
वतस्माद्वारिधेरुद्धरामि ॥ ८ ॥ कंठेहृताकुलमशेषमलंकरो
तिवेश्मस्थितानिखिलमेवतमोपहंति ॥ तामुज्वलांगुणवतीं

राम
२

धोःकृतिर्नस्यात्तततच्चरणैकतानयोः ॥ ३४ ॥ जगज्जनन्यांजग
दीशावैशासंस्यादेवयत्कर्मणिनःसमीहितं ॥ करोषिफल्गवव
प्युरुदीनवत्सलस्त्वएवधिष्ण्येभिरतस्यकिंतया ॥ ३५ ॥ यःपरं
रंहसःसाक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतंवासुदेवंप्र
पन्नःसप्रियोहिमे ॥ ३६ ॥ अथभागवतायूयंप्रियाःस्थभग
वान्यथा ॥ नमद्भागवतानांचप्रयानन्योस्तिकर्हिचित् ॥ ३७ ॥
तत्कर्महरितोषंयत्सा विद्यातन्मतिर्यया ॥ हरिर्देहभृतामा

त्मास्वयंप्रहसतिरीश्वरः॥३८॥यस्यास्तिभक्तिर्भगवत्यकिंच
नासर्वैर्गुणैस्तत्रसमासतेसुराः॥हरावभक्तस्यकुतोमहद्गु
णामनोरथेनाऽसतिधावतोबहिः॥३९॥हरिर्हिसाक्षाद्भगवान्
शरीरिणामात्मास्सषाणामिवतोयमीप्सितं॥हित्वामहांस्तंय
दिसज्जतेगृहेतदामहत्वंवयसादंपतीनां॥४०॥सवैपतिःस्या
दकुतोभयःस्वयंसमंततःपातिभयातुरंजनं॥सएकएवेतर
थामिथोभयंनैवात्मलाभादधिमन्यतेपरं॥४१॥सुरोऽसुरोवा

प्यथवानरोनरःसर्वात्मनायःसुकृतज्ञमीश्वरं॥भजेतरामं
मनुजाकृतिंहरिंयउत्तराननयत्कोशलान्दिवं॥४२॥नजन्मनू
नंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः॥तैर्यद्विसृ
ष्टानपिनोवनौकसश्चकारसख्येबतलक्ष्मणाग्रजः॥४३॥स
स्यंदिशत्यर्थितमर्थितोनृणांनैवार्थदोयत्पुनरर्थितायतः॥
स्वयंविधत्तेभजतामनिछतामिछापिधानंनिजपादपल्लवं॥
४४॥तत्साधुमन्येसुरवर्यदेहिनांसदासमुद्दिश्यधियामसद्ध्र

ह्नात् ॥ हित्वात्मपातंगृहमंधकूपंवनंगतोयध्दरिमाश्रयेत ॥ ४५ ॥
एतावानेवलोकेस्मिन्पुंसांधर्मःपरःस्मृतः ॥ भक्तियोगोभ
गवतितन्नामग्रहणादिभिः ॥ ४६ ॥ अविस्मितंतंपरिपूर्णकामं
स्वेनैवलाभेनसमंप्रशांतं ॥ विनोपसर्पत्यपरंहिबालिशः श्व
लांगुलेनातितितर्तिसिंधुं ॥ ४७ ॥ नारायणपराः सर्वेनकुतश्च
नबिभ्यति ॥ स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः ॥ ४८ ॥ वासु
देवेभगवतिभक्तिमुद्वहतांनृणां ॥ ज्ञानवैराग्यवीर्याणांनेह

कश्चिद्व्यपाश्रयः ॥ ४९ ॥ मतिर्नकृष्णेपरतः स्वतोवामिथोभि
पद्येतगृहव्रतानां ॥ अदांतगोभिर्विशतांतमोंधंपुनःपुनश्च
र्वितचर्वणानां ॥ ५० ॥ नतेविदुः स्वार्थगतिंहिविष्णुंदुराशया
येबहिरर्थमानिनः ॥ अंधायथांधैरुपनीयमानावागीशतं
त्यामुरुदाम्निबध्दाः ॥ ५१ ॥ कौमारआचरेत्प्राज्ञोधर्मान्भागवता
निह ॥ दुर्लभंमानुषंजन्मतदप्यध्रुवमर्थदं ॥ ५२ ॥ नह्यच्युतंप्री
णयतोबव्हायासोसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानांसिध्दत्वा

२तमिस्रं

दिहसर्वतः ॥५३॥ कौतिप्रयासोसुरबालकाहरेरुपासनेस्वेहृदि
छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनांसामान्यतः किं
विषयोपपादनैः ॥५४॥ रायः कलत्रंपशवः सुतादयोगृहामही
कुंजरकोशभूतयः सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वंति
मर्त्यस्यकियत्प्रियंचलाः ॥५५॥ एवंहिलोकाः क्रतुभिः कृताअ
मीक्षयिष्णवः सातिशयानिर्मलाः तस्माददृष्टश्रुतदूषणं
परंभक्त्यैकयेशंभजतात्मलब्धये ॥५६॥ तस्मादर्थाश्चकामा

श्चधर्माश्चयदपाश्रयाः भजतानीहयात्मानमनीहंहरिमीश्व
रं ॥५७॥ नालंद्विजत्वंदेवत्वमृषित्वंवासुरात्मजाः प्रीणनायमुकुं
दस्यनवृत्तंनबहुज्ञता ॥५८॥ नदानंनतपोनेज्यानशौचंनव्रता
निच प्रीयतेमलयाभक्त्याहरिरन्यद्विडंबनं ॥५९॥ मन्येधनाभि
जनरूपतपः श्रुतौजस्तेजः प्रभावबलपौरुषबुद्धियोगाः ना
राधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोषभगवान्गजयूथ
पाय ॥६०॥ चित्रंतवेहितमहोमितयोगमायालीलाविसृष्टभुव

भ.

नस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमस्वभावो भक्तप्रि
योयदसि कल्पतरुस्वभावः ॥ ९१ ॥ स्वमातुः स्विन्नगात्राया विस्र
स्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥ ९२ ॥
एवं संदर्शिता ह्यंग हरिणा भक्तवश्यता ॥ स्ववशेनापि कृष्णेन
यस्येदं सेश्वरं वशो ॥ ९३ ॥ नेमं विरिंच्यो न भवो न श्रीरप्यंगसंश्र
या ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥ ९४ ॥ नायं सु
खापो भगवान् देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां

राम
९

यथा भक्तिमतामिह ॥ ९५ ॥ श्रेयः सृतिं भक्तिमुदस्य ते विभो
क्लिश्यंति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशलएव शिष्यते
नान्यद्यथा स्थूलतुषावघातिनां ॥ ९६ ॥ पुरेह भूमन्बहवोपि यो
गिनस्त्वदर्पितेहा निजकर्मलब्धया ॥ विबुध्य भक्त्यैव कथोप
नीतया प्रपेदिरेंजोच्युत ते गतिं परां ॥ ९७ ॥ तस्मिन्भवंतावखि
लात्महेतौ नारायणे कारणमर्त्यमूर्त्तौ ॥ भावं विधत्तां नितरां म
हात्मन् किंवावशिष्टं युवयोः सुकृत्यं ॥ ९८ ॥ दानव्रततपोहोम

भ॰

जपस्वाध्यायसंयमैः॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ६८ कृष्णाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णेक्व चैष परमात्मनि रूढभावः॥ नन्वीश्वरोनुभजतो विदुषोपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ६९ नायं श्रियोंग उनितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः॥ रासोत्सवेस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनां॥ ७०॥ आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि

राम
१०

गुल्मलतौषधीनां॥ या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्यां॥ ७१॥ न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोत्र ७२ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः॥ ७३॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये॥ अंजः पुंसामविदुषां विद्धि भागवतान् हितान्॥ ७४॥

भा०

यानास्थायनरोराजनूनप्रमाद्येतकर्हिचित् ॥ धावन्निमील्यवा
नेत्रेनस्खलेन्नपतेदिह ॥७५॥ कायेनवाचामनसेंद्रियैर्वाबु
ध्यात्मनावानुसृतस्वभावात् ॥ करोतियद्यत्सकलंपरस्मैना
रायणेतिसमर्पयेत्तत् ॥७६॥ इष्टंदत्तंतपोजप्तंवृत्तंयच्चात्म
नःप्रियं ॥ दारानूगृहानूसुतानूप्राणानूयत्परस्मैनिवेदनं
७७ भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययो
ऽस्मृतिः ॥ तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरु

राम
११

देवतात्मा ॥७८॥ त्वांसेवतांसुरकृताबहवोंतरायाःस्वौकोवि
लंघ्यपरमंव्रजतांपदंते ॥ नान्यस्यबर्हिषिबलीनूददतःस्व
भागानूधत्तेपदंत्वमवितायदिविघ्नमूर्ध्नि ॥८०॥ मुखबाहू
रुपादेभ्यःपुरुषस्याश्रमैःसह ॥ चत्वारोजज्ञिरेवर्णागुणै
र्विप्रादयःपृथक् ॥८१॥ यएषांपुरुषंसाक्षादात्मप्रभवमीश्व
रं ॥ नभजंत्यवजानंतिस्थानाद्भ्रष्टाःपतंत्यधः ॥८२॥ घोरेक
लियुगेप्राप्तेसर्वेधर्मविवर्जिताः ॥ वासुदेवपरामर्त्यास्तेकृ

तार्थानसंशयः ॥ ८३ ॥ संसारकूपेपतितंविषयैर्मुषितेक्षणं ग्र
स्तंकालाहिनात्मानंकोन्यस्त्रातुमिहेश्वरः ॥ ८४ ॥ बाध्यमानो
पिमद्भक्तोविषयैरजितेंद्रियः प्रायःप्रगल्भयाभक्त्याविष
यैर्नाभिभूयते ॥ ८५ ॥ पुंश्चल्यापहृतंचित्तंकोन्योमोचयितुंक्ष
मः ॥ आत्मारामेश्वरमृतेभगवंतमधोक्षजं ॥ ८६ ॥ भक्त्योद्ध
वानपायिन्यासर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययंब्रह्मकारणं
मोपयातिसः ॥ ८७ ॥ यथाग्निःसुसमिद्धार्चिःकरोत्येधांसि

भस्मसात् तथामद्विषयाभक्तिरुद्धवैनांसिकृत्स्नशः ॥ ८८ ॥
नसाधयतिमांयोगोनसांख्यंधर्मउद्धव नस्वाध्यायस्तपस्त्या
गोयथाभक्तिर्ममोर्जिता ॥ ८९ ॥ भक्त्याहमेकयाग्राह्यः श्रद्धया
त्माप्रियःसतां भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभ
वात् ॥ ९० ॥ धर्मःसत्यदयोपेतोविद्यावातपसान्विता मद्भक्त्या
पेतमात्मानंनसम्यक्प्रपुनातिहि ॥ ९१ ॥ कथंविनारोमहर्षंद्रव
ताचेतसाविना विनानंदाश्रुकलयाशुध्येद्भक्त्याविनाशयः ॥ ९२ ॥

भ०

वाग्गद्गदाद्रवते यस्य चित्तं हसत्यभीक्ष्णं रुदति क्वचिच्च ॥ विलज्ज
उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ २३ ॥ यथाग्निना
हेममलं जहाति ध्मातं पुनः स्वं भजते स्वरूपं ॥ आत्मा च कर्मा
नुशयं विधूय मद्भक्तियोगेन भजत्यथो मां ॥ २४ ॥ वरमेकं वृणे
थापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्कत्तमां भक्तितत्परेषु त
थात्वयि ॥ २५ ॥ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृ
तिं बलिष्ठां ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु

राम
१३

सेवयाते ॥ २६ ॥ अन्त्याप्तनार्तकरुणानिशितिः शयानानामनो
रथधियाक्षणभग्ननिद्राः ॥ देवाहतार्थरचना मुनयोऽपि देव
युष्मत्प्रसंगविमुखा इह संसरंति ॥ २७ ॥ येऽभ्यर्थितामपि च नो
नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्मयत्र ॥ नाराधनं
भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते ॥
२८ ॥ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्य
ययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्म

दीयविमृशेन क्रियानिहार्थः॥९९॥ यदा यस्यानुगृह्णाति भगवा
नात्मभावितः॥ स जहाति मतिं लोके वेदे च परिनिष्ठितां॥१००॥
श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यः स्वपू
र्णः॥ न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्
कृतज्ञः॥१०१॥ राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुल
पतिः क्व च किंकरो वः॥ अस्त्वेवमंग भजतां भगवान्मुकुंदो मु
क्तिं ददाति कर्हिचित्स्म न भक्तियोगं॥१०२॥ सध्रीचीनो ह्ययं लो

के पंथाः क्षेमोऽकुतोभयः॥ सुशीलाः साधवो यत्र नारायण
परायणाः॥१०३॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः
समदृशो भगवत्प्रपन्नाः॥ तान्नोपसीदत हरेर्गदयाभिगुप्ता
न्नैषां वयं न च वयः प्रभवाम दंडे॥१०४॥ न तस्य कश्चिद्दयितः
सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा॥ तथापि भक्तान्भज
ते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः॥१०५॥ केवलेनैव भा
वेन गोप्यो गावो नगा मृगाः॥ येऽन्ये मूढधियो नागाः सिद्धा मा

मीपुरंजसा ॥ ६ ॥ भजंतियेविष्णुमनन्यचेतसस्तथैवत
त्कर्मपरायणानराः ॥ विनष्टरागादिमलाविमत्सरास्तरंति
संसारसमुद्रमश्रमं ॥ ७ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितंन
शोभतेज्ञानमलंनिरंजनं ॥ कुतः पुनः शश्वदभद्रमीश्वरे
नचार्पितंकर्मयदप्यकारणं ॥ ८ ॥ आत्मारामाश्चमुनयोनिर्ग्रं
थाअप्युरुक्रमे ॥ कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः ॥ ९ ॥
ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं ॥ नयोगसि

द्धीरपुनर्भवंवासमंजसत्वाविरहय्यकांक्षे ॥ १० ॥ तस्मान्मद्भ
क्तियुक्तस्ययोगिनोवैमदात्मनः ॥ नज्ञानंनचवैराग्यंप्रायः
श्रेयोभवेदिह ॥ ११ ॥ यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चय
त् ॥ योगेनदानधर्मेणश्रेयोभिरितरैरपि ॥ १२ ॥ तत्सर्वंभ
क्तियोगेनमद्भक्तोलभतेंजसा ॥ स्वर्गापवर्गौमद्धामकथंचिद्य
दिवांछति ॥ १३ ॥ नकिंचित्साधवोधीराभक्ताह्येकांतिनोमम
वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवं ॥ १४ ॥ नैरपेक्ष्यंपरं

भ०

प्राहुर्निश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे
भवेत् ॥१५॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां
समचित्तानां बुद्धेः परमुपेयुषां ॥१६॥ एवमेतान्मयादिष्टाननु
तिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥१७॥
इति श्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलि
तविवेकतैरभुक्तपरमहंसविष्णुपुरीग्रथितायां श्रीभागवता
मृताब्धि श्रीमद्भगवद्भक्तिरत्नावल्यां प्रथमविरचनं ॥१॥ ७॥

राम
१६

सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः ॥
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति
॥१॥ सत्सेवयादीर्घयाते जाता मयि दृढा मतिः ॥ हित्वावद्यमि
मं लोकं गंता मज्जनतामसि ॥२॥ तुलयाम लवेनापि न स्वर्गं ना
पुनर्भवं ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥३॥ य
त्पादसंश्रयाः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युपस्पृ
ष्टाः स्वर्धुन्यापोनुसेवया ॥४॥ नष्टप्रायेष्वभद्रेषु नित्यं भागव

तसेवया॥ भगवस्तूत्तमश्लोके भक्तिर्भवति नैष्ठिकी॥५॥ अहोव
यंजन्मभृतोऽद्य हाऽस्म वृद्धानुवृत्त्यापि विलोमजाताः॥ दौष्कु
ल्यमाधिंविधुनोति शीघ्रं महत्तमानामभिधानयोगः॥६॥ ये
षांसंस्मरणात्पुंसां सद्यः शुध्यंति वै गृहाः॥ किंपुनर्दर्शनस्प
र्शपादशौचासनादिभिः॥७॥ दुरापाह्यल्पतपसः सेवावै
कुंठवर्त्मसु॥ यत्रोपगीयते नित्यं देवदेवो जनार्दनः॥८॥ सत्से
वया भगवतः कूटस्थस्य मधुद्विषः॥ रतिरासो भवेत्तीव्रः पा

दयोर्व्यसनार्दनः॥९॥ प्रसंगमजरं पाशमात्मनः कवयो विदुः
स एव साधुषु कृतो मोक्षद्वारमपावृतं॥१०॥ तितिक्षवः का
रुणिकाः सुहृदः सर्वदेहिनां॥ अजातशत्रवः शांताः साध
वः साधुभूषणाः॥११॥ मय्यनन्येन भावेन भक्तिं कुर्वंति ये
दृढां॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः॥१२॥ मदा
श्रयाः कथामृष्टाः शृण्वंति कथयंति च॥ तपंति विविधास्ता
पा नैतान्मद्गतचेतसः॥१३॥ त एते साधवः साध्वि सर्वसंग

भ.

विवर्जिताः॥ संगस्तेष्वपि ते प्रार्थ्यः संगदोषहरा हि ते॥ १४॥ भक्तिं
मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां
येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृत
पानमत्तः॥ १५॥ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सु
तसुहृद्गृहवित्तदाराः॥ ये त्वब्जनाभ भवदीयपदारविंद सौगं
ध्यलुब्धहृदयेषु कृतप्रसंगाः॥ १६॥ तेषामहं पादसरोजरेणुमा
र्यावहेयाधि किरीटमायुः यन्नित्यदा बिभ्रत आशु पापं नश्यत्य

राम
१८

मुं सर्वगुणा भजंति॥ १७॥ संगमः खलु साधूनामुभयेषां च संम
तः॥ यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं॥ १८॥ अथानघां
घ्रेस्तव कीर्त्तितीर्थयोरंतर्बहिः स्नानविधूतपाप्मनां॥ भूतेष्व
नुक्रोशसुसत्वशीलिनां स्यात्संगमोनुग्रह एष नस्तव॥ १९॥ यत्रे
ड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः॥ निर्वैरं यत्र भूतेषु नोद्वे
गो यत्र कश्चन॥ २०॥ यत्र नारायणः साक्षान्न्यासिनां परमा गतिः
प्रस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः॥ २१॥ तेषां विचरतां प

भा०

श्चां तीर्थानां पावनेच्छया ॥ भीतस्य किं न रोचेत तावकानां समागमः
२२ ॥ महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं ॥ महां
तस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये ॥ २३ ॥ ये
वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्त्तिकेषु ॥ गृहेषु जाया
त्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ २४ ॥ गुरुर्न स
स्यात्स्वजनो न सः स्यात्पिता न स स्याज्जननी न सा स्यात् ॥ दैवं
न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युं ॥ २५ ॥ मा

राम
१९

गारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः ॥ यः
प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेंद्रियप्रियः
२६ ॥ अहो न जन्मा खिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्य
मुष्मिन् ॥ न यद्धृषीकेशयशः कृतात्मनां महात्मनां वः प्रचुरः
समागमः ॥ २७ ॥ न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधो
क्षजेमला ॥ मौहूर्त्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोपहतो
ऽविवेकः ॥ २८ ॥ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो

यदर्थः ॥ महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत याव
त् ॥ २९ ॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न
छंदसा नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेकं ॥ ३० ॥ तस्मा
दमूस्तनुभृतामहमाशिषोज्ञ आयुः श्रियं विभवमैंद्रियमावि
रिंच्यात् ॥ नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनयमो
निजभृत्यपार्श्वे ॥ ३१ ॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिका
ममनुयः प्रपतन्प्रसंगात् ॥ कृत्वात्मसात्सुरर्षिणा भगवन्गृही

तः सोहं कथं नु विसृजे तव भृत्यसेवां ॥ ३२ ॥ यत्संगलब्धं निज
वीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं ॥ हरत्यजोंतः श्रु
तिभिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमं ॥ ३३ ॥ अहं भक्तप
राधीनो ह्यस्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तज
नप्रियः ॥ ३४ ॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥
श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ॥ ३५ ॥ ये दारागारपुत्रा
प्तान्प्राणान्वित्तमिमं परं ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तु

भ०

मुत्सहे ३६ मयिनिर्बद्धहृदयाः साधवः समदर्शिनः वशेकु
र्वंतिमांभक्त्यासत्स्त्रियः सत्पतिंयथा ३७ मत्सेवयाप्रती
तंचसालोक्यादिचतुष्टयं नेछंतिसेवयापूर्णाः कुतोन्यत्काल
विप्लुतं ३८ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं मदन्यते
नजानंतिनाहंतेभ्योमनागपि ३९ भवद्विधामहाभागानि
षेव्याअर्हसत्तमाः श्रेयस्कामैर्नृभिर्नित्यंदेवाः स्वार्थानसा
धवः ४० भवापवर्गोभ्रमतोयदाभवेज्जनस्यतर्ह्यच्युतस

मागमः सत्संगमोयर्हितदैवसद्गतौपरावरेशेत्वयिजाय
तेमतिः ४१ नह्यंमयानितीर्थानिनदेवामृच्छिलामयाः तेपु
नंत्युरुकालेनदर्शनादेवसाधवः ४२ अहोवयंजन्मभृतो
लब्धंकार्त्स्न्येनतत्फलं देवानामपिदुष्प्रापंयद्योगेश्वरदर्श
नं ४३ किंस्वल्पतपसांनृणामर्चायांदेवचक्षुषां दर्शन
स्पर्शनप्रश्नप्रह्वपादार्चनादिकं ४४ नाग्निर्नसूर्यो
नचचंद्रतारकानभूर्जलंखंश्वसनोथवाङ्मनः उपासिता

भ॰

भेदस्ततोहरंस्वयंविपश्चितोघ्नंतिमुहूर्त्तसेवया ॥ ४५ ॥ यस्यात्मबु
द्धिः कुणपेत्रिधातुकेस्वधीः कलत्रादिषुभौमइज्यधीः ॥ यत्ती
र्थबुद्धिः सलिलेनकर्हिचिज्जनेष्वभिज्ञेषुसएवगोखरः
४६ ॥ साधवोन्यासिनः शांताब्रह्मिष्टालोकपावनाः ॥ हरंत्य
घंतेंगसंगात्तेष्वास्तेह्यघभिद्धरिः ॥ ४७ ॥ भूतानांदेवचरितं
दुखायचसुखायच ॥ सुखायैवहिसाधूनांत्वादृशामच्युता
त्मनां ॥ ४८ ॥ भजंतियेयथादेवान्देवाअपितथैवतान् ॥ छा

राम
२२

येवकर्मसचिवाः साधवोदीनवत्सलाः ॥ ४९ ॥ दुर्लभोमानु
षोदेहोदेहिनांक्षणभंगुरः ॥ तत्रापिदुर्लभंमन्येवैकुंठप्रिय
दर्शनं ॥ ५० ॥ नरोधयतिमांयोगोनसांख्यंधर्मउद्धव ॥ नस्वा
ध्यायस्तपस्त्यागोनेष्टापूर्त्तंनदक्षिणा ॥ ५१ ॥ व्रतानियज्ञः छं
दांसितीर्थानिनियमायमाः ॥ यथावरुंधेसत्संगः सर्वसंगा
पहोहिमां ॥ ५२ ॥ सत्संगेनहिदैतेयायातुधानाः खगामृगाः
गंधर्वाप्सरसोनागाः सिद्धाश्चारणगुह्यकाः ॥ ५३ ॥ विद्याध

भ॰

रामनुष्येषु वैश्याः शूद्रास्त्रियोंत्यजाः॥ रजस्तमः प्रकृतयः

स्तस्मिंस्तस्मिन्युगेयुगे॥५४॥ बहवोमत्पदंप्रासास्त्वाष्ट्रका

याधवादयः॥ वृषपर्वाबलिर्बाणोमयश्चाथविभीषणः

५५॥ सुग्रीवोहनुमानृक्षोगजोगृध्रोवणिक्पथः॥ व्याधः

कुब्जाव्रजेगोप्योयज्ञपत्न्यस्तथापरे॥५६॥ तेनाधीतश्रुति

गणानोपासितमहत्तमाः॥ अव्रतातप्ततपसः सत्संगान्

मामुपागताः॥५७॥ ततोदुःसंगमुत्सृज्यसत्सुसज्जेतबु

राम

२३

द्धिमान्॥ संतएवास्यछिंदंतिमनोव्यासंगमुक्तिभिः॥५८॥ यद्य

सद्भिः पथिपुनः शिश्नोदरकृतोद्यमैः॥ आस्थितोरमतेजंतु

स्तमोविशतिपूर्ववत्॥५९॥ सत्यंशौचंदयामौनंबुद्धिश्रीर्ह्री

र्यशः क्षमा॥ शमोदमोभगश्चेतियत्संगाद्यातिसंक्षयं॥६०॥

तेष्वशांतेषुमूढेषुयोषित्क्रीडामृगेषुच॥ संगंनकुर्याच्छोच्ये

ष्वखंडितात्मस्वसाधुषु॥६१॥ यथोपश्रयमाणस्यभगवंतं

विभावसुं॥ शीतंभयंतमोप्येतिसाधून्संसेवतस्तथा॥६२॥

भ०

निमज्जो न्मज्जतां घोरे भवा ब्धौ परमायनं ॥ संतो ब्रह्मविदः शांता नौर्दृढे वाप्सु मज्जतां ॥ ६३ ॥ अन्नं हि प्राणिनां प्राण आर्त्तानां शरणं त्वहं ॥ धर्मो वित्तं नृणां प्रेत्य संतो र्वाग्बिभ्यतोरणं ॥ ६४ ॥ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः ॥ देवता बांधवाः संतः संत आत्माहमेव च ॥ ६५ ॥ इति श्रीमद्भक्तिरत्नावल्यां टीकायां द्वितीयं विरचनं ॥ २ ॥ ७ ॥ श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं ॥ १ ॥ इ

राम
२४

ति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियते भगवत्यद्धा तन्मन्येधीतमुत्तमं ॥ २ ॥ श्रीविष्णोः श्रवणे परीक्षिदभवद्वैय्यासकिः कीर्त्तने प्रल्हादः स्मरणे ऽघ्रिपद्मभजने लक्ष्मीः पृथुः पूजने ॥ अक्रूरस्त्वभिवंदने कपिपतिर्दास्ये च सख्येऽर्जुनः सर्वस्वात्मनिवेदने बलिरभूत्कैवल्यमेते विदुः ॥ ३ ॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने ॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ ४ ॥ मुकुंदलिं

भ.

गालयदर्शनेदृशौतद्भृत्यगात्रस्पर्शांगसंगमं ॥ घ्राणंचतत्पा
दसरोजसौरभेश्रीमत्तुलस्यारसनांतदर्पिते ॥ ४ ॥ पादौहरेःक्षे
त्रपदानुसर्पणेशिरोहृषीकेशपदाभिवंदने ॥ कामंचदास्येन
तुकामकाम्ययायथोत्तमश्लोकजनाश्रयामतिः ॥ ५ ॥ श्रवणं
कीर्त्तनंचास्यस्मरणंमहतांगतेः ॥ सेवेज्यावंदनंदास्यंसख्य
मात्मसमर्पणं ॥ ६ ॥ श्रुतः संकीर्तितोध्यातः पूजितश्चादृतो
पिवा ॥ नृणांधुनोतिभगवान्हृत्स्थोजन्मायुताशुभं ॥ ७ ॥ शृ

ण्वंतिगायंतिगृणंत्यभीक्ष्णशः स्मरंतिनंदंतितवेहितंजनाः ॥
तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ॥ ८ ॥ अहं
हरेतवपादैकमूलदासानुदासोभवितास्मिभूयः ॥ मनःस्म
रेतासुपतेर्गुणानांगृणीतवाक्कर्मकरोतुकायः ॥ ९ ॥ अशेषसं
क्लेशशमंविधत्तेगुणानुवादश्रवणंमुरारेः ॥ कुतः पुनस्तच्च
रणारविंदपरागसेवारतिरात्मलब्धा ॥ १० ॥ नोत्तमश्लोकवा
र्त्तानांजुषतांतत्कथामृतं ॥ स्यात्संभ्रमोंतकालेपिस्मरतांतत्प

दांबुजं ॥११॥ मर्त्यस्तयानुसवमेधितया मुकुंदश्रीमत्कथाश्रव
णवर्णनचिंतयैति । तद्धामदुस्तरकृतांतजवापवर्गं ग्रामाद्व
नं क्षितिभुजोपि ययुर्यदर्थाः ॥१२॥ यानीह विश्वविलयोद्भववृ
त्तिहेतुकर्माण्यनंतविषयाणि हरिश्चकार । यस्त्वंग गायति शृ
णोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥१३॥ कामं
भवः स्ववृजिनैर्निरयेषु नः स्याच्चेतोलिवद्यदि नु ते पदयोर
मेत । वाचश्च नस्तुलसिवद्यदि तेंघ्रिशोभाः पूर्येत ते गुणगणै

र्यदि कर्णरंध्रः ॥१४॥ मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्र
याः । वाचोभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥१५॥ गृ
णतां शृण्वतां वीर्याण्युद्दामानि हरेर्मुहुः । यथा सुजातया भ
क्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥१६॥ यथा यथात्मा परिमृज्यते
सौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु
सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं ॥१७॥ शृण्वतः श्रद्धया नि
त्यं गृणतश्च स्वचेष्टितं । कालेन नातिदीर्घेण भगवान्विश

नेहृदि ॥१८॥ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं
हि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवा
तिवातः ॥१९॥ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः श्रो
तव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेछताभयं ॥२०॥ यानिर्वृत्ति
स्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वास्या
त् सा ब्रह्मणि स्वमहिमन्यपि नाथ माभूत्किंत्वंतकासि लुलि
तात्पततां विमानात् ॥२१॥ श्रृण्वन्सुभद्राणि रथांगपाणेर्जन्मा

नि कर्माणि च यानि लोके गीतानि नामानि तदर्थकानि गाय
न्विलज्जो विचरेदसंगः ॥२२॥ न यत्र श्रवणादीनि रक्षोघ्नानि
स्वकर्मसु कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥२३॥ जि
ह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणार
विंदं कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतो
ऽकृतविष्णुकृत्यान् ॥२४॥ बिलेबतोरुक्रमविक्रमान्ये न शृण्व
तः कर्णपुटे नरस्य जिह्वासती दार्दुरिकेव सूत न चोपगायत्यु

भ॰

रुगायगाथाः ॥२५॥ भारः परंपट्टकिरीटजुष्टमप्युत्तमांगंननमे
न्मुकुंदं ॥ शावौकरौनोकुरुतः सपर्यांहरेर्लसत्कांचनकंकणौ
वा ॥२६॥ बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्ष
तोये ॥ पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोह
रेर्यौ ॥२७॥ जीवन्शवोभागवतांघ्रिरेणुंनजातुमर्त्योभिल
भेतयस्तु ॥ श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसन्शवोय
स्तुनवेदगंधं ॥२८॥ वाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्म

राम
२८

करौमनश्च ॥ स्मरेद्वसंतंस्थिरजंगमेषुशृणोतितत्पुण्यक
थाः सकर्णः ॥२९॥ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्प
श्यतितद्धिचक्षुः ॥ अंगानिविष्णोरथतज्जनानांपादोदकंया
निभजंतिनित्यं ॥३०॥ एकांतलाभंवचसोनुपुंसांसुश्लोकमौ
लेर्गुणवादमाहुः ॥ श्रुतैश्चविद्वद्भिरुपाकृतायांकथासुधाया
मभिसंप्रयोगं ॥३१॥ तस्माद्गोविंदमाहात्म्यमानंदरससुंदरं
शृणुयात्कीर्तयेन्नित्यंसकृतार्थोनसंशयः ॥३२॥ इतिश्रीम

भगवद्भक्तिरत्नावल्यांटीकायांतृतीयविरचनं॥३॥ शृण्वतांस्व
कथांकृष्णः पुण्यश्रवणकीर्त्तनः॥ हृद्यंतस्थोह्यभद्राणि विधुनो
तिसुहृत्सतां॥१॥ पिबंतियेभगवतआत्मनः सतांकथामृतं
श्रवणपुटेषुसंभृतं॥ पुनंतितेविषयविदूषिताशयंव्रजंति
तच्चरणसरोरुहांतिकं॥२॥ धर्मः स्वनुष्ठितः पुंसांविष्वक्सेन
कथासुयः॥ नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं॥३॥ ज्ञानेप्रया
समुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्त्तां॥ स्थाने

स्थिताः श्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोऽजितजितोऽप्य
सितैस्त्रिलोक्यां॥४॥ नात्यंतिकंविगणयंत्यपितेप्रसादं किंत्वन्य
दर्पितभयंभ्रुवउन्नयैस्ते॥ येंगत्वदंघ्रिशरणाभवतः कथायाः
कीर्त्तन्यतीर्थयशसः कुशलारसज्ञाः॥५॥ कोवाभगवतस्तस्य
पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामोनशृणुयाद्यशः कलिमला
पहं॥६॥ प्रविष्टः कर्णरंध्रेणस्वानांभावसरोरुहं॥ धुनोतिशम
लंकृष्णः सलिलस्ययथाशरत्॥७॥ शुद्धिर्नृणांनतुतथेड्यदुरा

श्रयानां विद्याकृताध्ययनदानतपःक्रियाभिः ॥ सत्वात्मनामृ
षभते यशसि प्रवृद्धसछ्रद्धया श्रवणसंभृतया यथा स्यात् ८
निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् कउ
त्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ९ कोना
म तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य । नांतं गुणा
नामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥ १० ॥ ज्ञानं य
दाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उभयत्र गुणेष्वसं

कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु
रतिं न कुर्यात् ॥ ११ ॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥
तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया ॥ १२ ॥ तरवः किं न जी
वंति भस्त्राः किं न श्वसंत्युत । न खादंति न मेहंति किं ग्रामपश
वोपरे ॥ १३ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न य
त्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ १४ ॥ तान् शोच्यशोच्या
नविदोनुशोचे हरेः कथायां विमुखानघेन । क्षिणोति देवो ऽ

निमिषस्तु तेषामायुर्वृथावादगतिस्मृतीनां ॥१५॥ यत्रव्रजंत्य
घभिदोरचनानुवादाछृण्वंतियेन्यविषयाः कुकथामतिघ्नीः
यास्तुश्रुताहतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषु
तमःसुहंत ॥१६॥ पानेनतेदेवकथासुधायाः प्रवृद्धभक्त्यावि
शदाशयाये ॥ वैराग्यसारंप्रतिलभ्यबोधंयथांजसाऽन्वीयुर
कुंठधिष्ण्यं ॥१७॥ येतुत्वदीयचरणांबुजकोशगंधंजिघ्रंतिक
र्णविवरैः श्रुतिवातनीतं ॥ भक्त्यागृहीतचरणः परयाचतेषां

नापैषिनाथहृदयांबुरुहात्स्वपुंसां ॥१८॥ अयंत्वत्कथामृष्टपीयू
षनद्यांमनोवारणः क्लेशदावाग्निदग्धः ॥ तृषार्तोऽवगाढोनस
स्मारदावंननिष्क्रामतिब्रह्मसंपन्नवन्नः ॥१९॥ वरान्विभोत्वद्व
रदेश्वराद्बुधः कथंवृणीतेगुणविक्रियात्मनां ॥ येनारकाणा
मपिसंतिदेहिनांतानीशकैवल्यपतेवृणेनच ॥२०॥ तदप्यहं
नाथनकामयेक्वचिन्नयत्रयुष्मच्चरणांबुजासवः ॥ महत्तमां
तर्हृदयान्मुखच्युतोविधत्स्वकर्णायुतमेषमेवरः ॥२१॥ सउ

भा॰

त्तमश्लोकमहन्मुखच्युतोभवत्पदांभोजसुधाकणानिलः स्मृतिंपुनर्विस्मृततत्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः २२ यशः शिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेसकृत् कथंगुणज्ञोविरमेद्विनापशुंश्रीर्यत्प्रवव्रेगुणसंग्रहेच्छया २३ तस्मिन्महन्मुखरितामधुभिश्चरित्रपीयूषशेषसरितः परितः स्रवंतः तायेपिबंत्यवितृषोनृपगाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः २४ एतैरुपद्रुतोनित्यंजीवलो

राम ३२

कस्वभावजैः नकरोतिहरेर्नूनंकथामृतनिधौरतिं २५ नैषातिदुःसहाक्षुन्मांत्यक्तोदमपिबाधते पिबंतंत्वन्मुखांभोजच्युतंहरिकथामृतं २६ तंमोपयातंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः २७ अन्येषांपुण्यश्लोकानामुद्दामयशसांसतां उपश्रुत्यभवेन्मोदः श्रीवत्सांकस्यकिंपुनः २८ तस्माद्धीमन्कथांपुण्यांगोविंदचरिताश्रितां महत्पुण्यप्रदांमं

स्माच्छृणुष्व नृपसत्तम ॥ २९ ॥ नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृ
तं ॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥ ३० ॥ संसारसिंधु
मतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ॥ ली
लाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दित
स्य ॥ ३१ ॥ कुतोऽशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिः
सृतं क्वचित् ॥ पिबंति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृ
तिच्छिदं ॥ ३२ ॥ विभ्यस्तवामृतकथोदवहास्त्रिलोक्याः पादाव

नेजसरितः शमलानि हंतुं ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसं
गैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति ॥ ३३ ॥ तव विक्रीडितं ब्र
ह्मन्नृणां परममंगलं ॥ कर्णपीयूषमास्वाद्यत्यजत्यन्यस्पृहां
जनः ॥ ३४ ॥ वयं त्विह महायोगिन् भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वा
र्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ३५ ॥ तावत्कर्माणि कुर्वी
त न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जा
यते ॥ ३६ ॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ॥ आ

पाययतिगोविंदपादपद्मासवंमधु ॥ ३७ ॥ श्रुतस्यपुंसांसुचिरश्र
मस्यनन्वंजसासूरिभिरीडितोर्थः ॥ यत्तद्गुणानुश्रवणंमुकुंद
पादारविंदंहृदयेषुयेषां ॥ ३८ ॥ छिन्नान्यधीरधिगतात्मगतिर्नि
रीहस्तत्तस्मजेछिनदिदंवयुनेनयेन ॥ तावन्नयोगगतिभिर्य
तिरप्रमत्तोयावद्गदाग्रजकथासुरतिंनकुर्यात् ॥ ३९ ॥ तवकथा
मृतंतप्तजीवनंकविभिरीडितंकल्मषापहं ॥ श्रवणमंगलंश्री
मदाततंभुविगृणंतियेभूरिजनाः ॥ ४० ॥ नहिभगवन्नघटि

तमिदंत्वद्दर्शनान्नृणामखिलपापसंक्षयः ॥ यन्नामसकृच्छ्रवणा
त्पुल्कसोपिविमुच्यतेजन्मसंसारात्साक्षात् ॥ ४१ ॥ कोनामलोके
पुरुषार्थसारवित्पुराकथानांभगवत्कथासुधां ॥ आपीयकर्
णांजलिभिर्भवापहामहोविरज्येतविनानरेतरं ॥ ४२ ॥ नूनंदैवे
ननिहतायेचाच्युतकथासुधां ॥ हित्वाशृण्वंत्यसद्गाथाःपुरीषमि
वविड्भुजः ॥ ४३ ॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेभीक्ष्ण
ममंगलघ्नः ॥ तमेवनित्यंशृणुयादभीक्ष्णंकृष्णेमलांभक्तिम

भीप्समानः ॥४४॥ इत्थं परस्य निजवर्त्म रिरक्षयात्तलीलातनोस्त
दनुरूपविडंबनानि ॥ कर्माणि कर्मकषणानि यदूत्तमस्य श्रू
यादमुष्य पदयोरनुवृत्तिमिछन् ॥४५॥ इति श्रीभक्तिरत्नाव
ल्यां चतुर्थविरचनं ॥४॥ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्ट
स्य सूक्तस्य च बुद्धिदत्तयोः ॥ अविच्युतोर्थः कविभिर्निरूपितो य
दुत्तमश्लोकगुणानुवर्णनं ॥१॥ मृषा गिरस्ता ह्यसतीरसत्कथा न
कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंगलं तदेव पु

ण्यं भगवद्गुणोदयं ॥२॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्म
नसो महोत्सवं ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकय
शोनुगीयते ॥३॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ॥४॥ न यद्वचश्चित्रपदं
हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशंति
मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः ॥५॥ तद्वाग्विसर्गो ज
नताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य

यशांसि तानि यच्छृण्वंति गायंति गृणंति साधवः॥ ६॥ ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः॥ न कर्हिचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदं॥ ७॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि॥ ८॥ यायाः कथा भगवतः कथनीयोरुकर्मणः॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः॥ ९॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयं॥ योगिनां नृप निर्णीतं हरे

र्नामानुकीर्त्तनं॥ १०॥ एतदातुरचित्तानां मात्रास्पर्शेच्छया मुहुः॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं॥ ११॥ यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणंति॥ तेनेकजन्मशामलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये॥ १२॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥ १३॥ एतेनैव ह्यघोनोऽस्य कृतास्यादघनिष्कृतिः॥ यदा नारायणायेति जगाद चतुरक्षरं॥ १४॥ स्तेनः

भ०

सुरापोमित्रध्रुक्ब्रह्महागुरुतल्पगः ॥ स्त्रीराजपितृगोहंताये
चपातकिनोऽपरे ॥१५॥ सर्वेषामप्यघवतामिदमेवसुनिष्कृतं
नामव्याहरणंविष्णोर्यतस्तद्विषयामतिः ॥१६॥ ननिष्कृतैरुदि
तैर्ब्रह्मवादिभिस्तथाविशुध्यत्यघवान्व्रतादिभिः ॥ यथाह
रेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं ॥१७॥ नैकां
तिकंतद्धिकृतेपिनिष्कृतेमनः पुनर्धावतिचेदसत्पथे ॥ तत्क
र्मनिर्हारमभीप्सतांहरेर्गुणानुवादः खलुसत्वभावनः ॥१८॥

राम
३७

अथैनंमापनयतकृताशेषाघनिष्कृतं ॥ यदसौभगवन्नाम
म्रियमाणः समग्रहीत् ॥१९॥ सांकेत्यंपारिहास्यंवास्तोभंहेल
नमेववा ॥ वैकुंठनामग्रहणमशेषाघहरंविदुः ॥२०॥ पतितः
स्खलितोभग्नः संदष्टस्तप्तआहतः ॥ हरिरित्यवशेनाहपु
मान्नार्हतियातनाः ॥२१॥ गुरूणांचलघूनांचगुरूणिचलघूनि
च ॥ प्रायश्चित्तानिपापानांज्ञात्वोक्तानिमहर्षिभिः ॥२२॥ तैस्ता
न्यघानिपूयंतेतपोदानजपादिभिः ॥ नाधर्मजंतद्धृदयंतद

भ.

पीशांघ्रिसेवया ॥२३॥ अज्ञानादथवाज्ञानादुत्तमश्लोकनामयत्
संकीर्तितमघंपुंसोदहेदेधोयथानलः ॥२४॥ यथागदंवीर्यतम
मुपयुक्तंयदृच्छया ॥ अजानतोप्यात्मगुणंकुर्यान्मंत्रोप्युदाहृतः
॥२५॥ एवंसविप्लावितसर्वधर्मादास्याः पतिः पतितोगर्ह्यकर्म
णा ॥ निपात्यमानोनिरयेहतव्रतः सद्योविमुक्तोभगवन्नामगृ
ह्णन् ॥२६॥ नातःपरंकर्मनिबंधकृंतनंमुमुक्षतांतीर्थपदानुकी
र्तनात् ॥ नयत्पुनः कर्मसुसज्जतेमनोरजस्तमोभ्यांकलिलंत

तोन्यथा ॥२७॥ म्रियमाणोहरेर्नामगृणन्पुत्रोपचारितं ॥ अजा
मिलोप्यगाद्धामकिमुतश्रद्धयागृणन् ॥२८॥ नामोच्चारणमाहा
त्म्यंहरेः पश्यतपुत्रकाः ॥ अजामिलोपियेनैवमृत्युपाशादमु
च्यत ॥२९॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलोमनुः ॥ प्रह्ला
दोजनकोभीष्मोबलिर्वैयासकिर्वयं ॥३०॥ एतावतालमघनि
र्हरणायपुंसांसंकीर्त्तनंभगवतोगुणकर्मनाम्नां ॥ विक्रुश्यपुत्र
मघवान्यदजामिलोपिनारायणेतिम्रियमाणइयायमुक्तिं ॥३१॥

वेदतदिदंनमहाजनोयंदेव्याविमोहितमतिर्बतमाययाऽलं॥
त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणि
युज्यमानः॥३१॥एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मना
विदधतेखलुभावयोगं॥तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पा
तकंतदपिहंत्युरुगायवादः॥३२॥अथापिमेदुर्भगस्यवि
बुधोत्तमदर्शने॥भवितव्यंमंगलेनयेनात्मामेप्रसीदति॥३३॥
अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपतेः॥वैकुंठनामग्रहणं

जिह्वावक्तुमिहार्हति॥३४॥क्वचाहंकितवःपापोब्रह्मघ्नोनिरप
त्रपः॥क्वचनारायणेत्येतद्भगवन्नाममंगलं॥३५॥ब्रह्महापितृ
हागोघ्नोमातृहाचार्यहाघवान्॥श्वादःपुल्कसकोवापिशुद्ध्येर
न्यस्यकीर्त्तनात्॥३६॥अहोबतश्वपचोतोगरीयान्यज्जिह्वा
ग्रेवर्त्ततेनामतुभ्यं॥तेपुस्तपस्तेजुहुवुःसस्नुरार्याब्रह्मानू
चुर्नामगृणंतियेते॥३७॥गृहेष्वाविशतांवापिपुंसांकुशलक
र्मणां॥मद्वार्त्तायातयामानांनबंधायगृहामताः॥३८॥तस्मा

भ.

दहं विगतविक्लवईश्वरस्य सर्वात्मना महि गृणामि यथा मनीषं ।
नीचोजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णि
तेन ॥ ३९ ॥ सोहं प्रियस्य सुहृदः परदेवताया लीला कथास्तव
नृसिंह विरिंचिगीताः ॥ अंजस्तितर्म्यनुगृणन्गुण विप्रमुक्तो
दुर्गाणि ते पदयुगालयहंससंगः ॥ ४० ॥ मंत्रतस्तंत्रतश्छिद्रं
देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नामसंकीर्तनं त
व ॥ ४१ ॥ पादोहनेऽवहननेमथनोपलेपप्रेंखेंखनार्भरुदितो

राम
४०

क्षणमार्जनादौ ॥ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या व्र
जस्त्रिय उरुक्रमचित्तयानाः ॥ ४२ ॥ क उत्सहेत संत्यक्तुमुत्तम
श्लोकसंविदं ॥ अनिछतोपि यस्य श्री रंगान्नच्यवते क्वचित् ।
४३ ॥ गायंति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्म
विमोक्षणं च ॥ गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च
लब्धशरणा मुनयो वयं च ॥ ४४ ॥ जिह्वां लब्ध्वापि यो विष्णुं की
र्तनीयं न कीर्तयेत् ॥ लब्ध्वापि मोक्षनिःश्रेणीं स नारोहति दुर्म

भ·

तिः॥४५॥ गांदुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां
च॥ वित्तं त्वतीर्थीकृतमंगवाचं हीनां मया रक्षति दुःखदुःखी
४६॥ यस्यां न मे पावनमंग कर्म स्थितिस्तद्भवप्राणनिरोधमस्य
लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः
४७॥ कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः॥ कीर्तनेनै
व कृष्णस्य सर्वः स्वार्थोभिलभ्यते॥४८॥ न ह्यतः परमो लाभो
देहिनां भ्राम्यतामिह॥ यतो विंदेत परमां शांतिं नश्यति संसृ

राम
४१

तिः॥४९॥ ते सभाग्या मनुष्येषु कृतार्था नृप निश्चितं॥ स्मरंतः
स्मारयंतो ये हरेर्नाम कलौ युगे॥५०॥ कलेर्दोषनिधे राजन्न
स्ति ह्येको महान् गुणः॥ कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजे
त्॥५१॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः॥ द्वापरे प
रिचर्यायां कलौ तद्धरिकीर्तनात्॥५२॥ विष्णोर्नु वीर्यगणनां क
तमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि॥ चस्कंभ यः
स्वरहसास्खलता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं॥५३॥

भ.

नांतं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरेये ॥ गायन्गुणान्दशशतानन आदिदेवः शेषोधुनापि समवस्यति नास्यपारं ॥ ५४ ॥ येवा अनंतस्य गुणाननंतानतुक्रमिष्यन्सतु बालबुद्धिः ॥ रजांसि भूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः ॥ ५५ ॥ यस्याखिलामीवहभिः स्कमंगलैर्वाचोविमिस्त्रागुणजन्मकर्मभिः ॥ प्राणंति शुंभंति पुनंति वैजगत्यास्तद्विरक्ताः शवशोभनामताः ॥ ५६ ॥ इत्थं

राम
४२

हरेर्भगवतोरुचिरावतारवीर्याणि बाल्यचरितानि च शंतमानि ॥ अन्यत्रचेहच श्रुतानि गृणन्मनुष्योभक्तिंपरांपरमहंसगतौ लभेत ॥ ५७ ॥ इति मत्पुरुषोत्तमचरणारविंद॰ भक्तिरत्नावल्यां पंचमं विरंचनं ॥ ५ ॥ ७ ॥ अहो यूयं स्म पूर्णार्थाभवंसो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पितंमनः ॥ १ ॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतोमन आहृष्यमय्यक्षावेश्यते यथा ॥ २ सद्यन्मनः लख्यदार

भ॰

विंदयोर्निवेशितं तद्गुणरागिभैरिह ॥ न ते यमं पाशभृतश्च तद्भटा न् स्वप्नेपि पश्यंति हि चीर्णनिःकृताः ३ ॥ न भारती मेंगमृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ॥ ४ ॥ एतावानृ सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥ ५ ॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं ॥ म्रियमाणो ह्यवहितस्ततो याति परां गतिं ६ ॥ म्रियमाणै

राम

४३

रभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं नयत्यंग सर्वात्मा सर्वदर्शनः ॥ ७ ॥ अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि च शं तनोति ॥ सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ॥ ८ ॥ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते ॥ ९ ॥ पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसंभवान् ॥ सर्वान् हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ १० ॥

भ.

यथाहेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं ॥ एवमात्मगतो विष्णु
र्योगिनामशुभाशयं ॥ ११ ॥ मन्येऽसुरान्भागवतांस्त्र्यधीशेसं
रंभमार्गाभिनिविष्टचित्तान् ॥ येसंयुगेऽचक्षततार्क्ष्यपुत्रमं
सेसुनाभायुधमापतंतं ॥ १२ ॥ भजंत्यथत्वामतएवसाधवो
व्युदस्तमायागुणविभ्रमोदयं ॥ भवत्पदानुस्मरणादृतेसतां
निमित्तमन्यद्भगवन्नविद्महे ॥ १३ ॥ भूयादघोनि भगवद्भिरका
त्रिदंडो यो नौ हरेत सुरहेलनमप्यशेषं ॥ मावोऽनुतापकलया

राम
४४

भगवत्स्मृतिघ्नो मोहो भवेदिहतु नौ व्रजतोरधोधः ॥ १४ ॥ न
न्नः समादिशोपायं येन ते चरणाब्जयोः ॥ स्मृतिर्यथा न विर
मेदपि संसरतामिह ॥ १५ ॥ शय्यासनाटनालापक्रीडास्ना
नाशनादिषु ॥ न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥
१६ ॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः ॥ मयासंतु
ष्टमनसः सर्वाः सुखमया दिशः ॥ १७ ॥ न पारमेष्ठ्यं न महें
द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं ॥ न योग न सिद्धीरपुनर्भ

वंवामय्यर्पितात्मेछतिमद्विनान्यत्॥१८॥ मय्यर्पितात्मनः सभ्य
निरपेक्षस्यसर्वतः॥ मयात्मनासुखंयत्तत्कुतः स्याद्विषयात्म
नां॥१९॥ वैरेणयंनृपतयः शिशुपालपौंड्रशाल्वादयोगति
विलासविलोकनाद्यैः॥ ध्यायंतआकृतधियः शयनासना
दौतत्साम्यमापुरनुरक्तधियांपुनः किं॥२०॥ निभृतमरु
न्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासतेतदरयोपियुः
स्मरणात्॥ स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियोवयम

पितेसमाः समदृशोंघ्रिसरोजसुधाः॥२१॥ एनः पूर्वकृतंय
त्तद्राजानः कृष्णवैरिणः॥ जहुस्त्वंतेतदात्मानः कीटः पेश
स्कृतोयथा॥२२॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते
मामनुस्मरतश्चित्तंमय्येवप्रविलीयते॥२३॥ दृष्टंतवांघ्रि
युगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः॥
संसारकूपपतितोत्तरणावलंबंध्यायंश्चराम्यनुगृहाण
यथास्मृतिः स्यात्॥२४॥ आहुश्चतेनलिननाभपदारविं

द्यं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोध्ध
रणावलंबं गेहंजुषामपि मनस्युदियात्सदा नः ॥ २५ ॥ स्मर्त्तव्यः
सततं विष्णुर्विस्मर्त्तव्यो न जातुचित् ॥ सर्वे विधिनिषेधाः स्यु
रेतयोरेव किंकराः ॥ २६ ॥ तस्मादसदभिध्यानं यथा स्वप्नम
नोरथं ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं ॥ २७ ॥ इ
ति श्रीमद्भगवद्भक्तिरत्नावलीटीकायां षष्ठं विरंचनं ॥ ६ ॥

देवोसुरो मनुष्यो वा यक्षो गंधर्व एव च ॥ भजन्मुकुंदचरणं स्व

स्तिमान्स्याद्यथा वयं ॥ १ ॥ मत्प्रार्थयेऽजेशादयः प्रभो
तप्यंत उग्रं तप ऐंद्रियेधियः ॥ ऋते भवत्पादपरायणान्नमां
विंदंत्यहं त्वद्धृदया यतो जित ॥ २ ॥ त्वय्यंबुजाक्षाखिलसत्वधा
म्नि समाधिनावेशितचेतसैके ॥ त्वत्पादपोतेन महत्कृतेन
कुर्वंति गोवत्सपदं भवाब्धिं ॥ ३ ॥ अथापि ते देव पदांबुजद्वय
प्रसादलेशानुगृहीत एव हि ॥ जानाति तत्वं भगवन्महिम्नो
न चान्य एकोपि चिरं विचिन्वन् ॥ ४ ॥ मर्त्यो मृत्युव्यालभीतः

भा०

पलायन्‌लोकान्सर्वान्‌निर्भयंनाध्यगच्छत्‌॥ त्वत्पादाब्जंप्राप्यय
दृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति॥५॥ तस्माद्भजोराग
विषादमन्युमानस्पृहाभयदैन्याधिमूलं॥ हित्वागृहंसंसृति
चक्रवालंनृसिंहपादंभजताकुतोभयं॥६॥ अथातआनंद
दुघंपदांबुजंहंसाःश्रयेरन्नरविंदलोचन॥ सुखंनुविश्वेश्व
रयोगकर्मभिस्त्वन्माययामीविहतानमानिनः॥७॥ दाश्लोम
हानिहभवार्णवमप्लवेशांषड्वर्गनक्रमसुखेनतितीर्षंति

राम
४७

तआर्योवरमात्मबंधनं॥२१॥ नवयंसाध्विसाम्राज्यंस्वाराज्यंभो
ज्यमप्युत॥ वैराज्यंपारमेष्ठ्यंवाआनंत्यंवाहरेःपदं॥२२॥ कामया
महएतस्यश्रीमत्पादरजःश्रियः॥ कुचकुंकुमगंधाढ्यंमूर्ध्ना
वोढुंगदाभृतः॥२३॥ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं
नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः॥२४॥ मन्येकुतश्चि
द्भयमच्युतस्यपादांबुजोपासनमत्रनित्यं॥ उद्विग्नबुद्धेरस
दात्मभावाद्विश्वात्मनायत्रनिवर्ततेभीः॥२५॥ सत्कास्वधर्मं

चरणांबुजंहरेर्भजन्नपक्वोथपतेततोयदि । यत्रक्ववाभद्रमभू
दमुष्यकिंकोवार्थआप्तोभजतांस्वधर्मतः ॥ २६ ॥ स्वपादमूलं
भजतः प्रियस्यत्यक्तान्यभावस्यहरिः परेशः । विकर्मयच्चोत्प
तितंकथंचिद्धुनोतिसर्वंहृदिसन्निविष्टः ॥ २७ ॥ कोनुत्वच्चरणां
भोजमेवंविद्विसृजेत्पुमान् । निःकिंचनानांशांतानांमुनीनांय
स्त्वमात्मदः ॥ २८ ॥ तावद्भयंद्रविणदेहसुहृन्निमित्तंशोकस्पृहाप
रिभवोविपुलश्चलोभः । तावन्ममेत्यसदवग्रहआर्तिमूलंया

वन्नतेंघ्रिमभयंप्रवृणीतलोकः ॥ २९ ॥ ज्ञानवैराग्ययुक्तेनभक्ति
योगेनयोगिनः ॥ क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं ॥ ३० ॥
इत्यच्युतांघ्रिंभजतोऽनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भ
वंतिवैभागवतस्यराजन्ततः परांशांतिमुपैतिसाक्षात् ॥
३१ ॥ इतिश्रीमत्पुरुषोत्तमच्चरणारविंदद्वयपामकरंदविंदुप्रो
न्मीलितविवेकतैभुक्तपरमहंसविष्णुपुरीग्रंथितायांश्रीभा
गवतामृताब्धिलब्धभगवद्भक्तिरत्नावल्यांसस्तमंविरंचनं ॥ ७ ॥

भ.

यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः प्राणो
पहाराच्चयथेंद्रियाणीतथैवसर्वार्हणमच्युतेज्या १ यथाहि
स्कंधशाखानांतरोर्मूलावसेचनं एवमाराधनंविष्णोःसर्वेषा
मात्मनश्चहि २ क्रियाकलापैरिदमेवयोगिनःश्रद्धान्विताः
साधुयजंतिसिद्धये भूतेंद्रियांतःकरणोपलक्षणंवेदेचतंत्रे
चतएवकोविदाः ३ चित्तस्योपशमोयंवैकविभिःशास्त्रच
क्षुषा दर्शितःसुगमोयोगोधर्मश्चात्ममुदावहः ४ अयं

राम
५१

स्वस्त्ययनःपंथाद्विजातेर्गृहमेधिनः यच्छ्रद्धयाप्तवित्तेनशुक्ले
नेज्येतपूरुषं ५ नैवात्मनःप्रभुरयंनिजलाभपूर्णोमानंजना
दविदुषःकरुणोवृणीते यद्यज्जनोभगवतेविदधीतमानं
तच्चात्मनेप्रतिमुखस्ययथामुखश्रीः ६ नूनंविमुष्टमतय
स्तवमाययातेयेत्वांभवाप्ययविमोक्षणमन्यहेतोः अर्चंतिक
ल्पकतरुंकुणपोपभोग्यमिच्छंतियत्स्पर्शजंनरकेपिनृणां ७
यत्पादयोरशठधीःसलिलंप्रदाययदूर्वांकुरैरपिविधायसतींस

भ०

पर्यो ॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वान विक्लवमना
ऋषभमार्तिमृच्छेत् ॥ ८ ॥ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः
अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ॥ ९ ॥ इति श्री भक्ति
रत्नावल्यां अष्टमं विरचनं ॥ ८ ॥ ममाद्यामंगलं नष्टं फलवांश्चैव
वमे भवः यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजं ॥ १ ॥ तत्ते
नुकंपां सुसमीक्ष्यमाणो भुंजान एवात्मकृतं विपाकं हृद्वाग्वपु
र्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ २ ॥ पतितः

राम
५२

स्खलितो वार्त्तः क्षुधितो विवशो गृणन् हरये नम इत्युच्चैर्मुच्य
ते सर्वपातकात् ॥ ३ ॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वा
नि दिशो द्रुमादीन् सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं
प्रणमेदनन्यः ॥ ४ ॥ इति श्री भक्तिरत्नावल्यां नवमं विरचनं ॥ ९ ॥
यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः तस्य तीर्थपदः किं
वा दासानामवशिष्यते ॥ १ ॥ तावद्रागादयः स्तेनास्तावत्कारागृ
हं गृहं तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनाः ॥ २ ॥ किं चित्र

भ०

मच्युत तवैतदशेषबंधोदासेष्वनन्यशरणेषु यदात्मसात्वं ॥ यो रोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपाद पीठः ॥ ३ ॥ कायेन वाचा मनसेंद्रियैर्वा बुध्यात्मना वानुसृतस्वभा वात् करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् ॥ ४ ॥ इति श्रीभक्तिरत्नावल्यां दशमं विरचनं ॥ १० ॥ ७ ॥ ॥ अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां ॥ यन्मित्रं परमानं दं पूर्णं ब्रह्म सनातनं ॥ १ ॥ एवं मनः कर्मवशं प्रयुंक्ते अविद्य

राम
५३

यात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते दे हयोगेन तावत् ॥ २ ॥ इति श्रीभक्तिरत्नावल्यां एकादशं विर चनं समाप्तं ॥ ११ ॥ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥ तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥ १ ॥ धर्मार्थकाम इति योभिहितस्त्रिवर्ग ईक्षा त्रं यीनयदमौ विविधा च वार्त्ता ॥ मन्ये तदेतदखिलं निगमस्य स त्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २ ॥ इति श्रीभक्ति

भ.

रत्नाकरस्योद्दादशविरंचनं ॥१२॥ ७॥ देवर्षिभूताप्तनृणांपितॄ
णांनकिंकरोनायमृणीचराजन् सर्वात्मनायः शरणंशरण्यं
गतोमुकुंदंपरिहृत्यकर्त्तं ॥१॥ किंदुरापादनंतेषांपुंसामुद्दामचे
तसां ॥ यैराश्रितस्तीर्थपदश्चरणोव्यसनात्ययः ॥२॥ शारी
रामानसादिव्यावैयासेयेचमानुषाः ॥ भौतिकाश्चकथंक्ले
शाबाधंतेहरिसंश्रयं ॥३॥ यत्रनिर्विष्टमरणंकृतांतोनाभि
मन्यते ॥ विश्वंविध्वंसयन्शौर्यवीर्यविस्फुरितभ्रुवा ॥४॥

राम
५४

अविस्मितंतंपरिपूर्णकामंस्वेनैवलाभेनसमंप्रशांतं ॥ विनो
पसर्पत्यपरंहिबालिशः श्वलांगुलेनातितितर्तिसिंधुं ॥५॥
बालस्यनेहशरणंपितरौनृसिंहनार्त्तस्यचागदमुदन्वतिम
ज्जतोनौः ॥ तप्तस्यतत्प्रतिविधिर्यइहांजसेष्टस्तावद्विभोतनु
भृतांत्वदुपेक्षितानां ॥६॥ कः पंडितस्त्वदपरंशरणंसमीयाद्भ
क्तप्रियादृतगिरःसुहृदःकृतज्ञात् सर्वान्ददातिसुहृदोभ
जतोभिकामानात्मानमप्युपचयापचयौनयस्य ॥७॥ अहो

तिर्यंनस्यादवत्तास्पदं ॥ किंविद्याः सरघाः किमुज्वलकुलाः
किंपौरुषाः किंगुणास्तत्किंसुंदरमादरेण रसिकैर्नापीयतेत
न्मधु ॥ १३ ॥ इति श्रीपुरुषोत्तमचरणारविंदरसामकरंदविं
दुप्रोन्मीलितविवेकतैरभक्तपरमहंसविष्णुपुरीग्रथिता
यां श्रीभागवताब्धिलब्धश्रीमद्भगवद्भक्तिरत्नावलीसमा
प्तिमाला संपूर्णमस्तु ॥ ७ ॥ श्रीकृष्णार्पणमस्तु ॥ ७ ॥